**प्रेतश्राद्ध** न० प्रेतोद्देश्यकं श्राद्धम्। प्रेतोद्देशके आद्यश्राद्धादिसपिण्डीकरणान्तश्राद्धे तस्य गौणकालादि ति०त० उक्तम् यथा "मासेऽन्यस्मिन् तिथौ तस्मिन् तदा दद्याद्विचक्षणः"। तथा श्रा०त० दर्शितं यथा "षोडशश्राद्धानां यत्पतितं कृष्णैकादश्यां तत्कर्त्तव्यम्। तथा च लघुहारीतः "श्राद्धविघ्ने समुत्पन्ने मृताहाऽविदिते तथा। एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः"। विशेषत इत्यमावस्यापेक्षया तस्यामपि विघ्नादौ विधानात्। यथा हेमाद्रिधृतं षट्त्रिंशन्मतम् "मासिके चाब्दिके स्वह्नि संप्राप्ते मृतसूतके। वदन्ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणैः"। राजमार्त्तण्डे "श्राद्धविघ्ने समुत्पन्ने अन्तरा मृतसूतके। एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः। श्राद्धविघ्ने समुत्पन्ने मृतस्याविदिते तथा। अमावस्यां प्रकुर्वीत वदन्त्येके मनीषिणः"। अत्र मृतसूतकोपदानात् ऋष्यशृङ्गवचनेऽशौचपदमेतत्परम्। यत्त्वन्तरा मृतसूतकेऽप्येकादश्यां श्राद्धविधानं तत् "देये पितॄणां श्राद्धे तु अशौचं जायते यदि। तदशौचे व्यतीते तु तेषां श्राद्धं विधीयते। शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते। सा तिथिस्तस्य कर्त्तव्या नत्वन्या वै कदाचन" इति ऋष्यशृङ्गवचनविरोधात् अशौचान्तदिने मलमासादिरूपविघ्नान्तरेण तदकरणे। अतएव श्राद्धविवेके अपाटवाद्यशौचाभ्यामपि पतितमेकोद्दिष्टमेकादश्यामशौचान्ते च मलमासे न कर्त्तव्यं किन्तु मलमासाव्याप्तकृष्णैकादश्यामेवेत्युक्तम्"।

**प्रेति** पु० प्रकर्षेण इतिर्गमनं देहेऽस्य। १अग्नौ यजु० १५।६ वेददी०। प्र+इ—भावे क्तिन्। २मरणे स्त्री ऋ०१।२२।४

**प्रेतीषणि** त्रि० प्राप्तगमने ऋ० ६।१।८

**प्रेत्य** अव्य० प्र+इ—ल्यप्। १लोकान्तरे अमरः "प्रेत्य संज्ञा नास्ति" श्रुतिः। २मृत्वेत्यर्थे प्रकर्षेण देहत्यागेन अन्यदेहं गत्वेत्यर्थे च। प्रेत्यजातिः प्रेत्यभावः।

**प्रेत्यजाति** स्त्री प्रेत्य मृत्वा जातिर्जन्म। मृत्वा जन्मनि।

**प्रेत्यभाव** पु० प्रेत्य मृत्वा भावः। मरणोत्तरं पुनर्जन्मनि। "पुनरुत्पत्तिः प्रेत्यभावः" गौ०सू० १।१।१९ "उत्पन्नस्य क्वचित् सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः। उत्पन्नस्य सम्बद्धस्य सम्बन्धस्तु देहेन्द्रियमनोबुद्धिवेदनाभिः पुनरुत्पत्तिः पुनर्देहादिभिः सम्बन्धः पुनरित्यभ्यासाभिधानम् यत्र क्वचित् प्राणभृन्निकाये वर्त्तमानः पूर्वोपात्तान् देहादीन् जहाति तत् प्रैति यत् ततोऽन्यत्र देहादीनन्यानुपादत्ते तद्भवति प्रेत्यभावो मृत्वा पुनर्जन्म सोऽयं जन्ममरणप्रबन्धाभ्यासोऽनादिरपवर्गान्तः प्रेत्यभावो वेदितव्य इति" वात्स्या०। प्रवाहरूपेणानादिसम्बन्धः संसारः प्रेत्यभावः यथोक्तं कणा० सू० उप०वृ० "इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिः" "तत्संयोगो विभागः" सू० "इदानीं धर्माधर्मयोः प्रयोजनं प्रेत्यभावमाह। ताभ्यां धर्माधर्माभ्यां संयोगो जन्म अपूर्वाभिः शरीरेन्द्रियवेदनाभिः सम्बन्धः संयोग इहोच्यते विभागस्तु शरीरमनोविभागो मरणम् तथा चायं जन्ममरणप्रबन्धः संसारः प्रेत्यभावापरनामा धर्माधर्माभ्यामित्यर्थः अस्यैव च प्रेत्यभावस्याजरञ्जरीभाव इति वैदिकी संज्ञा"। "जातस्य च ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" गीतायां च जन्ममरणप्रवाहस्य ध्रुवत्वमुक्तम्।

**प्रेत्वन्** पु० प्र+इ—क्वनिप्। १इन्द्रे २वाते मेदि०।

**प्रेमन्** पु०न० प्रियस्य भाव इमनिच् प्रादेशः एकाचकत्वात् न टिलोपः। १सौहार्दे २स्नेहे ३हर्षे मेदि० (वायौ इन्द्रे) शब्दस्तोमोक्तिः प्रामादिकी। "यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः" उज्ज्वलमण्युक्ते ४भावबन्धभेदे पु०

**प्रेमपातन** न० प्रेम्णा स्नेहेन पातनं यस्य। १नेत्रजले २तदुपलक्षिते लोचने शब्दच०।

**प्रेमबन्ध** पु० ६त०। गाढानुरागे।

**प्रेमभक्ति** स्त्री प्रेम्णा भक्तिः। श्रीकृष्णे प्रेम्णा स्नेहेन भक्तौ तल्लक्षणं नारदपञ्चरात्रे उक्तं यथा "अनन्यममता विष्णौ ममता प्रेमसंप्लुता। भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैरिति"। प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम्। सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम्"। तच्चिह्नानि भाग०७स्क० उक्तानि यथा "निशम्य कर्माणि गुणानतुल्यान् वीर्याणि लीलातनुभिः कृतानि। यदाऽतिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति नृत्यते च। यदा ग्रहग्रस्त इव क्वचिद्धसति क्रन्दते ध्यायति वन्दते जनः। मुहुः श्वसन् वक्ति हरे! जगत्पते! नारायणेत्यात्ममतिर्गतत्रपः। तदा पुमान् मुक्तसमस्तबन्धनस्तद्भावभावानुकृताशयाकृतिः। निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम्"।

**प्रेमिन्** त्रि० प्रेमास्त्यस्य व्रीह्या० इनि टिलोपः। प्रेमयुते

**प्रेयस्** त्रि० अतिशयेन प्रियः प्रिय+ईयसुन् प्रादेशः एकाचकत्वात् न टिलोपः। प्रियतमे स्त्रियां ङीप् "प्रेयसापि मोज्झिता" प्रबोधच०। १पत्यौ पु० २भार्य्यायां स्त्री हेम०।